शेषानुपपत्तेरिति । ननु तथापि विश्रामाश्रयस्य नित्यत्वे मानाभाव इत्यत आह यत्र त्विति । असमवेतकार्य्योत्पत्ति प्रसङ्ग इति असमवेतभावकार्य्योत्पत्तिप्रसङ्ग इत्यर्थः । ननु तस्य नित्यत्वसिद्धावपि अणुत्वे किं मानमित्यत आह महत्परिमाणेति । चाक्षुषद्रव्यत्वादिति अत्रात्मनि व्यभिचारवाराय चाक्षुषपदं घटाभावे व्यभिचारवारणाय द्रव्यपदम् तदवयवसिद्धाविति त्रसरेण्ववयसिद्धावित्यर्थः । तदसिद्धेरिति अवयवधाराया असिद्धेरित्यर्थः । अत्र नव्याः त्रसरेणोरवयवाः सावयवा इत्याद्यनुमानयोरुक्तयोरप्रयोजकत्वेन त्रुटावेव विश्रामः नच चाक्षुषं प्रति महत्त्वं कारणं तथाच त्रुटौ महत्त्वमावश्यकं तच्चावयवसंख्याजन्यमिति अवयवं विना नोत्पद्यते इत्यनुकूलतर्कसत्त्वान्नाप्रयोजकत्वं द्व्यणुकसाधकानुमानस्येति वाच्यम् त्रसरेणुमहत्त्वस्य नित्यत्वस्वीकारेणोक्ततर्कानवतारात् नचाणुव्यवहारस्याणुपरिमाणनिबन्धनतया तदाश्रयद्रव्यसिद्धिराश्यकीति वाच्यम् तस्यापकृष्टपरिमाणनिबन्धनत्वात् महत्यपि महत्तमादणुव्यवहारात् न चैवं त्रसरेणुपुञ्जएवास्त्ववयवीति वाच्यम् विशकलितेष्वपि तेषु घट इत्यादिप्रत्ययप्रसङ्गात् नच तत्संयोगवृत्त्येव घटत्वं घटोद्रव्यमित्यादिप्रतीतौ च परम्परया तद्भानमिति वाच्यं सम्भवति साक्षात्सम्बन्धविषयत्वे परम्परासम्बन्धविषयकत्वकल्पने गौरवादित्याहुः । ननु परमाणुत्रयेण कुतो न द्रव्यान्तरोत्पत्तिः परमाणुद्वयेन द्व्यणुकवत् द्व्यणुकद्वयेन द्रव्यान्तरोत्पत्त्यापत्तिस्त्रिभिर्द्व्यणुकैस्त्र्यणुकवदिति चेन्न प्रमाणाभावेन तादृशद्रव्यासिद्धौ परमाणुत्रये द्व्यणुकद्वये च द्रव्यारम्भकसंयोगाऽकल्पनात् । अत्रेदं चिन्त्यं त्रिभिः परमाणुभिरेव त्र्यणुकमस्तु परमाणुभ्यामनारम्भे सिद्धान्तिनां द्व्यणुकाभ्यामनारम्भ इव मानाभावात् फलबलेन त्रयाणामेव युगपद्द्रव्यारम्भसंयोगकल्पनात् वस्तुतो गवाक्षरश्मे दृश्यमानानां द्व्यणुकत्वमेव युक्तमणुद्वयारब्धत्वे लाघवादिति"। अयमवयवी कारणात् भिन्नएव कार्य्यकारणयोरैक्याभावात् नियतपूर्व्ववर्त्तिन एव कारणतया कारणस्य प्राक्सत्त्वनियमेन कार्य्यस्य च तदाऽसत्त्वेन तयोर्भेदात् । अतएव "द्रव्याणि द्रव्यान्तरभारभन्ते" इति वै० सूत्रे अन्तरपदमुपात्तम् इति वैशेषिकादयः स्वीचक्रुः । सांख्यावेदान्तिनस्तु कार्य्यस्य कारणैक्यमेव स्वीचक्रुः तथाहि "तदनन्यत्वमारम्भणशब्दादिभ्यः" "युक्तेश्च शब्दान्तराच्च" शा० सू० तद्भाष्ये चोक्तम् । 'युक्तेश्च प्रागुत्पत्तेः कार्य्यस्य सत्त्वमनन्यत्वञ्च कारणादवगम्यते शब्दान्तराच्च । युक्तिस्तावद्वर्ण्यते दधिघटरुचकाद्यर्थिभिः प्रतिनियतानि कारणानि क्षीरसुवर्णमृत्तिकादीन्युपादीयमानानि लोके दृश्यन्ते न हि दध्यर्थिभिर्मृत्तिकोपादीयते न घटार्थिभिः क्षीरम् । तच्चासत्कार्य्यवादे नोपपद्यते । अविशिष्टे हि प्रागुत्पत्तेः सर्वत्र सर्व्वस्यासत्त्वे कस्मात् क्षीरादेव दध्युत्पद्यते न मृत्तिकायाः, मृत्तिकाया एव घट उत्पद्यते न क्षीरात् । अथाविशिष्टेऽपि प्रागसत्त्वे क्षीरएव दध्नः कश्चिदतिशयो न मृत्तिकायां, मृत्तिकायामेव घटस्य कश्चिदतिशयो न क्षीरे इत्युच्येत तर्ह्यतिशयवत्त्वात् प्रागवस्थाया असत्कार्य्यवादहानिः सत्कार्य्यवादसिद्धिश्च । शक्तिश्च कारणस्य कार्य्यनियमार्था कल्प्यमाना नान्याऽसती वा कार्य्यं नियच्छेत् असत्त्वाविशेषादन्यत्वाविशेषाच्च । तस्मात् कारणस्यात्मभूता शक्तिः शक्तेश्चात्मभूतं कार्य्यम् । अपिच कार्य्यकारणयोर्द्रव्यगुणादीनां चाश्वमहिषवद्भेदबुद्ध्यभावात्तादात्म्यमभ्युपगन्तव्यम् । समवायकल्पनायामपि समवायस्य समवायिभिः सम्बन्धेऽभ्युपगम्यमाने तस्य तस्यान्योऽन्यः सम्बन्धः कल्पयितव्यः इत्यनवस्थाप्रसङ्गः अनभ्युपगम्यमानेऽत्र विच्छेदप्रसङ्गः । अथ समवायः स्वयं सम्बन्धरूपत्वादनपेक्ष्यैवापरं सम्बन्धं सम्बध्यते, संयोगोऽपि तर्हि स्वयं सम्बन्धरूपत्वादनपेक्ष्यैव समवायं सम्बध्येत । तादात्म्यप्रतीतेश्च द्रव्यगुणादीनां समवायकल्पनानर्थक्यम् । कथञ्च कार्य्यमवयविद्रव्यं कारणेष्ववयवेषु वर्त्तमानं वर्त्तेत किं समस्तेष्ववयवेषु वर्त्तेतउत प्रत्यवयवम् । यदि तावत् समस्तेषु वर्त्तेत ततोऽवयव्यनुपलब्धिः प्रसज्येत, समस्तावयवसन्निकर्षस्याशक्यत्वात् नहि बहुत्वं समस्तेष्वाश्रयेषु वर्त्तमानं व्यस्ताश्रयग्रहणेन गृह्यते । अथावयवशः समस्तेषु वर्त्तेत तदाप्यारम्भकावयवव्यतिरेकेणावयविनोऽवयवाः कल्प्येरन् यैरवयवैरारम्भकेष्ववयवेष्ववयवी वर्त्तेत । कोशावयवव्यतिरिक्तैर्ह्यवयवैरसिः कोशं व्याप्नोति । अनवस्था चैवं प्रसज्येत तेषु तेष्ववयवेषु वर्त्तयितुमन्येषामन्येषामवयवानां कल्पनीयत्वात् । अथ प्रत्यवयवं वर्त्तेत तदैकत्र व्यापारेऽन्यात्राव्यापारः स्यात् न हि देवदत्तः स्रुघ्ने सन्निधीयमानस्तदहरेव पाटलिपुत्रे सन्निधीयते युगपदनेकत्र वृत्तावनेकत्वप्रसङ्गात् देवदत्तयज्ञदत्तयोरिव स्रुघ्नपाटलिपुत्रनिवासिनोः । गोत्वादिवत् प्रत्येकं परिसमाप्तेरदोष इति चेन्न तथा प्रतीत्यभावात् । यदि गोत्वादिवत् प्रत्येकं परिसमाप्तोऽवयवी स्यात् यथा गोत्वं प्रतिव्यक्ति प्रत्यक्षं गृह्यते एवमवय-